-ग्रं १५०.

~~२२१~~

नं- ६

स्तोत्र.

# दुर्गास्मरणम्

६

६९८ | स्तो. ८०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

१ ॥श्रीगणेशायनमः॥युधिष्ठिरउवाच॥क्लिश्यमानेषु
भूतेषुतैस्तैर्भावैस्ततस्ततः॥दुर्गाण्यतितरद्येनतन्मे
ब्रूहिपितामह॥१॥भीष्मउवाच॥आश्रमेषुयथोक्तेषु
यथोक्तंयेद्विजातयः॥वर्त्तंतेसंयतात्मानोदुर्गाण्यतित
रंतिते॥२॥येदंभान्नाचरंतिस्मयेषांवृत्तिश्चसंयता॥
विषयांश्चनिगृह्णंतिदुर्गाण्यतितरंतिते॥३॥प्रत्याहुर्नो
च्यमानायेनहिंसंतिचहिंसिताः॥प्रयच्छंतिनयाचंतेदु
र्गाण्यति०॥४॥वासयंत्यतिथीन्नित्यंनित्यंयेचानसूयकाः॥ राम
नित्यंस्वाध्यायशीलाश्चदुर्ग्गाण्यतितरंतिते॥५॥मातापि १

Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(1A)

त्रोश्चयेवृत्तिंवर्त्तंतेधर्मकोविदाः॥ वर्ज्जयंतिदिवास्वप्नंदु
र्गाण्यतितरंतिते॥६॥ येवापापंनकुर्वंतिकर्मणामनसागि
रा॥ निक्षिप्तदंडाभूतेषुदुर्गा०॥७॥ येनलोभान्नयंत्यर्थो
न्राजानोरजसान्विताः॥ विषयान्परिरक्षंतिदुर्गा०॥८॥
स्वेषुदारेषुवर्त्तंतेन्यायवृत्तिमृतावृतौ॥ अग्निहोत्रपराः
संतोदुर्गा०॥९॥ आहवेषुचयेश्शूरास्त्यक्त्वामरणजंभ
यं॥ धर्मेणजयमिच्छंतिदुर्गा०॥१०॥ येवदंतीहसत्यानिप्रा
णत्यागेप्युपस्थिते॥ प्रमाणभूताभूतानांदु०॥११॥ कर्मा
ण्यकुहकार्थानियेषांवाचश्चसूनृताः॥ येषामर्थाश्चसंब

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

२ ह्रा दुर्गा०॥१२॥ अनध्यायेषु ये विप्राः स्वाध्यायं नेह कुर्वते॥
तपोनिष्ठाः सुतपसो दुर्गा०॥१३॥ ये तपश्च तपस्यंति कौ
मार ब्रह्मचारिणः॥ विद्याव्रतस्नाता दुर्गा०॥१४॥ ये च
संशांतरजसः संशांततमसश्च ये॥ संखेस्थिनामहात्मानो
दु०॥१५॥ येषां न कश्चित्त्रसति न त्रसंति हि कस्यचित्॥
येषामात्मसमो लोको दुर्गा०॥१६॥ परश्रिया न तप्यंति
ये संतः पुरुषर्षभाः॥ ग्राम्यादर्थान्निरताश्च दुर्गा०॥१७॥
सर्वान्देवान्नमस्यंति सर्वधर्मांश्च शृण्वते॥ ये श्रद्दधानाः शां
ताश्च दुर्गा०॥१८॥ येन मानि खमिच्छंति मानयंति च ये परा २

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

न॥ मान्यमौन्नमस्यंति दुर्गाण्यतितरंति ते॥१९॥ ये च श्राद्धानि
कुर्वंति तिथ्यां तिथ्यां प्रजार्थिनः॥ सुविशुद्धेन मनसा दु०॥२०॥
ये क्रोधं संनियच्छंति क्रुद्धान्संशमयंति च॥ न च कुप्यंति भूता
नां दुर्गा०॥ २१॥ मधुमांसं च ये नित्यं वर्जयंतीह मानवाः॥
जन्मप्रभृति मद्यं च दु०॥२२॥ यात्रार्थं भोजनं येषां संतानार्थं
च मैथुनं॥ वाक्सत्यवचनार्थाय दु०॥२३॥ ईश्वरं सर्वभूता
नां जगतः प्रभवाप्ययं॥ भक्ता नारायणं देवं दुर्गा०॥२४॥
य एष पद्मरक्ताक्षः पीतवासा महाभुजः॥ सुहृद्भ्राता च मि
त्रं च संबंधी च तथाच्युतः॥२५॥ य इमान्सकलांल्लोकान्च

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

३

र्भवत्परिवेष्ट्येत॥ इच्छन्प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः॥
२६॥ स्थितः प्रियहिते जिष्णोः स एव पुरुषोत्तमः॥ राजंस्तव च
दुर्धर्षो वैकुंठः पुरुषर्षभः॥ २७॥ य एनं संश्रयंतीह भक्त्या ना
रायणं हरिं॥ ते तरंतीह दुर्गाणि न चात्रास्ति विचारणा॥ २८॥
दुर्गातितरणं ये च पठंति श्रावयंति च॥ कथयंति च विप्रेभ्यो
दुर्गाण्यतितरंति ते॥ २९॥ इति कृत्यसमुद्देशः कीर्तितस्तेम
यानघ॥ नरं ते येन दुर्गाणि परत्रेह च मानवाः॥ ३०॥ इति श्री
महाभारते शांतिपर्वणि राजधर्मे दुर्गातितरणं नाम नवशात
ततमोध्यायः॥ श्रीगोपालो विजयते॥ श्रीसांबसदाशिवायनमः॥ ३

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com